# RAMAKRISHNA MISSION VIDYAMANDIRA

**(Residential Autonomous College affiliated to University of Calcutta)**

**B.A./B.Sc. FIRST SEMESTER EXAMINATION, MARCH 2021**
**FIRST YEAR [BATCH 2020-23]**
**SANSKRIT (HONOURS)**
**Paper : II [CC 2]**

Date : 26/03/2021
Time : 11.00 am - 1.00 pm
Full Marks : 50

1. यथेच्छ**<u>मेकः</u>** समाधेयः। [1×10]

क) शुकनासानुसारं लक्ष्मीचञ्चलतां विश्लेषयतु।

ख) वाणोच्छिष्टं जगत्सर्वम् सूक्तिरियं व्याख्यातव्या।

2. संस्कृतभाषया देवनागरीलिप्या च यथेच्छ**<u>मेकस्य</u>** व्याख्या लेख्या। [1×6]

क) सरस्वती परिगृहीतमीर्ष्ययेव नालिङ्गति जनम्।

ख) अपरिनामोपशमो दारुणो लक्ष्मीमदः।

3. अधोलिखितयोः कस्याप्ये**<u>कस्य</u>** वङ्गभाषया आङ्गलभाषया वा अनुवादं कुरुत। [1×4]

क) नवयौवनकषायितात्मनश्च सलिलानीव तान्येव विषयस्वरूपाण्यास्वाद्यमानानि मधुरतराण्यापतन्ति मनसः। नाशयति च दिङ्मोह इवोन्मार्गप्रवर्त्तकः पुरुषमत्यासङ्गो विषयेषु।

ख) कुसुमशरशरप्रहारजर्जरिते हि हृदये जलमिव गलत्युपदिष्टम्। अकारणञ्च भवति दुष्प्रकृतेरन्वयः श्रुतं वा विनयस्य। चन्दनप्रभवो न दहति किमनलः,किं वा प्रशमहेतुनापि न प्रचण्डतरीभवति वडवानलो वारिणा।

4. कश्चि**<u>देकः</u>** प्रश्नः समाधेयः । [1×10]

क) भवत्पाठ्यांशानुसारं जरद्गव-दीर्घकर्ण-कथा संक्षेपेण समुपस्थापनीया ।

ख) भवदधीतग्रन्थानुसारं पान्थ-वृद्धव्याघ्र-कथा समासेन वर्णनीया ।

5. वङ्गभाषया आङ्गलभाषया वा कस्यचि**<u>देकस्य</u>** पद्यस्य अनुवादः कार्यः। [1×4]

क) माता मित्रं पिता चेति स्वभावात्त्रितयं हितम् ।
कार्यकारणतश्चान्ये भवन्ति हितबुद्धयः ॥

ख) यत्र विद्वज्जनो नास्ति श्लाघ्यस्तत्राल्पधीरपि ।
निरस्तपादपे देशे एरण्डोऽपि द्रुमायते ॥

6. पद्य**<u>मेकं</u>** सप्रसङ्गं व्याख्यायताम् । [1×6]

क) काव्यशास्त्रविनोदेन कालो गच्छति धीमताम् ।
व्यसनेन च मूर्खाणां निद्रया कलहेन च ॥

ख) षड् दोषाः पुरुषेणेह हातव्या भूतिमिच्छता ।

निद्रा तन्द्रा भयं क्रोध आलस्यं दीर्घसूत्रता ॥

7. पद्य**<u>मेकं</u>** सप्रसङ्गं व्याख्यायताम् । [1×5]

क) यस्मिन् देशे न सम्मानो न वृत्तिर्न च बान्धवः।

न च विद्यागमोप्यस्ति वासं तत्र न कारयेत्।।

ख) यो ध्रुवाणि परित्यज्य अध्रुवं परिसेवते।

ध्रुवाणि तस्य नश्यन्ति अध्रुवं नष्टमेव हि।।

8. अधोधृतास्वुद्धृतिषु यथेच्छं **<u>द्वयोः</u>** रिक्तस्थानपूर्तिः विधातव्या। [2×2.5]

क) .......... कुमित्रे च मित्रे .......।।

ख) .......... पदे पदे।।

ग) ........... स्त्री शोभते गृहे।।

घ) .........क्षमा रूपम्.................।।

——— × ———